## प्रत्ययोत्तरपदयोश्च। (९८/१३७३)

एकवचने इत्यनुवर्तते। प्रत्यये उत्तरपदे च परत एकवचने वर्तमानयोः युष्मदस्मदो[1]र्मपर्यन्तस्य त्व म इत्येतावादेशौ भवतः। [2]तवायं त्वदीयः। मदीयः। अतिशयेन त्वम् त्वत्तरः। मत्तरः। त्वाम् इच्छति त्वद्यति। [3]मद्यति। त्वमिवाचरति त्वद्यते। [4]मद्यते। उत्तरपदे – तव पुत्रः त्वत्पुत्रः। मत्पुत्रः। त्वं नाथोऽस्य त्वन्नाथः। मन्नाथः। [5]एकवचने इत्येव, युष्माकमिदम् युष्मदीयम्। अस्मदीयम्। युष्माकं पुत्रः, अस्माकं पुत्रः युष्मत्पुत्रः, अस्मत्पुत्रः। विभक्तौ इत्यधिकारात् पूर्वयोगो विभक्तावेव। ततोऽन्यत्रापि प्रत्यये उत्तरपदे च यथा स्यात् इत्ययमारम्भः।

ननु चात्राप्यन्तर्वर्तिनी विभक्तिरस्ति, तस्यामेवादेशौ [6]भविष्यतः? नैवं शक्यम्, लुका तस्या [7]भवितव्यम्। बहिरङ्गो लुक्, अन्तरङ्गौ आदेशौ, प्रथमं [8]तौ [9]भविष्यतः? एतदेव [10]तर्हि आदेशवचनं ज्ञापकम् अन्तरङ्गानपि विधीन् बहिरङ्गो[11]ऽपि लुक् बाधते (व्या. प. १२८) इति। तेन गोमान् प्रियोऽस्य गोमत्प्रियः इत्येवमादौ [12]नुमादि लुका बाध्यते। एवं च सति 'त्वाहौ सौ' (७.२.९४/३८४) इत्येवमादयोऽपि प्रत्ययोत्तरपदयोरादेशा न भवन्ति। त्वं प्रधानमेषां त्वत्प्रधानाः। मत्प्रधानाः। यूयं पुत्रा अस्य युष्मत्पुत्रः। अस्मत्पुत्रः। तुभ्यं हितं त्वद्धितम्। मद्धितम्। तव पुत्रः त्वत्पुत्रः। मत्पुत्रः। अथ [13]किमर्थमेषां त्वाहादीनां बाधनार्थमेतन्न विज्ञायते? लक्ष्यस्थित्यपेक्षया। ज्ञापकार्थे [14]ह्येतस्मिन् बहुतरमिष्टं [15]सङ्गृह्यते॥

## त्रिचतुरोः स्त्रियां तिसृचतसृ। (९९/२९८)

त्रि चतुर् इत्येतयोः स्त्रियां वर्तमानयोः तिसृ चतसृ इत्येतावादेशौ भवतो विभक्तौ परतः। तिस्रः। चतस्रः[16]। तिसृभिः। चतसृभिः। स्त्रियाम् इति किम्? त्रयः। चत्वारः। [17]त्रीणि। चत्वारि।

स्त्रियाम् इति चैतत् त्रिचतुरोरेव विशेषणं नाङ्गस्य। तेन यदा त्रिचतुःशब्दौ स्त्रियाम्, अङ्गं तु [18]लिङ्गान्तरे, [19]तदाप्यादेशौ भवत एव। प्रियाः तिस्रो [20]ब्राह्मण्योऽस्य ब्राह्मणस्य प्रियतिसा ब्राह्मणः। प्रियतिस्रौ, प्रियतिस्रः। प्रियतिसृ ब्राह्मणकुलम्, प्रियतिसृणी, प्रियतिसृणि। प्रियचतसा, प्रियचतस्रौ, प्रियचतस्रः। प्रियचतसृ, प्रियचतसृणी, प्रियचतसृणि। [21]'नद्यृतश्च' (५.४.१५३/८३३) इति समासान्तो न भवति, [22]विभक्त्याश्रयत्वेन तिसृभावस्य बहिरङ्गलक्षणत्वात्। यदा तु त्रिचतुःशब्दौ लिङ्गान्तरे,[23] स्त्रियामङ्गम्, तदा आदेशौ न भवतः।

---

1. मपर्यन्तयोः क. 2. तवेदं त्वदीयम् मदीयम् क. 3. मां इच्छति इत्यधिकम् इ. 4. अहमिवाचरति इत्यधिकम् क.इ. 5. एकवचनम् ब. 6. भवतः क.ब.ह. 7. भाव्यम् ब. 8. तौ नास्ति ह. 9. भवतः क. 10. हि क. 11. अपि नास्ति क. 12. नुमादिकम् क. 13. कथं क. 14. ह्यस्मिन् क. 15. सङ्गृहीतं भवति ह. 16. तिस्रः पश्य इत्यधिकम् क. 17. नास्ति क. 18. लिङ्गान्तरे वर्तते क. 19. तदादेशौ भवतः क. 20. ब्राह्मण्यः नास्ति ब. 21. नद्यृतश्च – लक्षणत्वात् नास्ति क. 22. विभक्त्याश्रयत्वात् ह. 23. वर्तेते इत्यधिकम् ड.